यामास विष्णोरेवाज्ञया पुनः। सूर्य्यो द्विधा विभज्याथ तच्छरीरं तदा रथे। स्वके संस्थापयामास प्रीतये पितृदेवयोः। यदर्द्धभागस्तस्यास्तु शरीरस्य द्विजोत्तमाः!। प्रातःसन्ध्याभवत् सा तु अहोरात्रान्तमध्यगा। यः शेषभागस्तस्यास्तु अहोरात्रान्तमध्यगः। स सायमभवत् सन्ध्या पितृप्रीतिप्रदा सदा। सूर्य्योदयाच्च प्रथमं यदा स्यादरुणोदयः। प्रातःसन्ध्या तदोदेति देवानां प्रीतिकारिणी। अस्तं गते ततः सूर्य्ये शोणपद्मनिभा सदा। उदेति सायंसन्ध्यापि पितॄणां मोदकारिणी"। सन्धौ काले उपास्या सन्ध्या ७त०। पूर्व्वसन्ध्याकाले उपास्यायां गायत्रीप्रतिपाद्यपरमेश्वररूपायां २देवतायाञ्च यथोक्तं भरद्वाजस्मृतौ ७अ० यथा

"गायन्तं त्रायते यस्मात् गायत्रीति स्मृता ततः। प्राणा गया इति प्रोक्तास्त्रायते तानथापि वा। गायत्रीति भवेन्नाम केवलं त्रायतीति वा। व्यानशे प्राणजिह्वासु सदा वाक्प्रवर्त्तनात्। सरस्वतीति नाम्ना च समाख्याता महर्षिभिः। सवितृप्रकाशकरणात् सावित्रीत्यभिधा भवेत्। जगतः प्रसवित्रीति हेतुनानेन वापि च। तस्मादियं सदोपास्या निशादिवसयोर्द्विजैः। गायत्री सन्धिवेलायां सैव सन्ध्येति कीर्त्तिता। यो जपेद्वदनं ज्ञात्वा नश्यन्त्यंहांसि तत्क्षणात्। ऋषिच्छन्दो देवताश्च जपेत्तास्वान्विताः क्रमात्। ज्ञात्वा पदानि स्तुत्वाथ तुरीयं पादमव्ययम्। ब्रह्मणा याति तत्साम्यं पदं ज्ञात्वा तुरीयकम्। या गायत्री त्रिचरणा सा त्रिमूर्त्तिस्वरूपिणी। उपास्यानन्तरं विप्रैस्त्रिसन्ध्यासु त्रिमूर्त्तिषु। तुरीयपादमेतस्या ज्ञात्वा योपास्तिमाचरेत्। सा रत्नपूर्णां पृथिवीं ददन्नो दोषभाग्भवेत्। ब्रह्मकेशवरुद्रादिदेवताभिरुपासिता। सन्ध्यान्तां कोन सेवेत विप्रः स्यादभिलाषुकः। प्रातः सतारकां सन्ध्यां सायं सन्ध्यां सभास्कराम्। स्नानकर्म्मणि तन्मध्यामुपासीत यथाविधि। प्रातरेवमुपास्यैव प्रकुर्य्यात् हवनं जपम्। स्नानस्यानन्तरं कुर्य्यात् तर्पणञ्च महाक्रतून्। सायं सन्ध्यामुपासीत होमं कुर्व्वीत शासनात्। सन्ध्योपासनहीनो यो न योग्यः सर्व्वकर्म्मसु। तस्मादुपास्य विधिना सन्ध्यामन्यक्रियाश्चरेत्। नोपासयेद्द्विजः सन्ध्यां योऽसौ शूद्रत्वमाप्नुयात्। कर्म्मण्यन्यानि संत्यज्य सन्ध्यां यः केवलं द्विजः। उपास्ते, सर्व्वपुण्यानि कृतवान् स भवेदलम्। सन्ध्योपास्तिं विना विप्रः पुण्यान्यन्यानि चाचरेत्। यस्तस्य तानि पापानि भवन्त्येव न संशयः। नाशयेत् जन्मजनितं पापं दशजपादनु। पुराकृतं शतजपाद्गायत्र्यास्तु द्विजन्मनः। कृतं युगेऽपि चैकस्मिन् सहस्रेण जपेन तु। सद्भक्त्या जपतस्तस्माद्गायत्रीं सर्व्वदा जपेत्। समस्तसप्ततन्तुभ्यो जपयज्ञः परं स्मृतः। हिंसया ते प्रवर्त्तन्ते जपयज्ञो न हिंसया। यावन्तः कर्म्मयज्ञाश्च दानानि च तपांसि च। ते सर्व्वे जपयज्ञस्य कलां नार्हन्ति षोडशीम्। जपेन देवता नित्यं स्तूयमाना प्रसीदति। प्रसन्ना विपुलान् भोगान् दद्यान्मुक्तिञ्च शाश्वतीम्। यक्षराक्षसवेतालप्रेतभूतपिशाचकाः। जपाश्रयं द्विजं दृष्ट्वा दूरन्ते यान्ति भीतितः। तस्माज्जपः सदा श्रेष्ठः सर्व्वस्मात् पुण्यसाधनात्। इत्येवं सर्व्वथा ज्ञात्वा विप्रो जपपरो भवेत्। एवं जपपरः सन्ध्यां भक्त्योपासीत यो द्विजः। नियमेन सदा गच्छेदृषित्वं नात्र संशयः। तस्माज्जितेन्द्रियो नित्यं सन्ध्योपास्तिं समाचरेत्। स सर्व्वलोकान् जित्वाऽथ विप्रः स्वर्गमानयेत्। तदन्ते ब्रह्मभावेन यावदाभूतसम्प्लवम्। तावन्नित्यो निरातङ्को भवेदत्र न संशयः। एवं सन्ध्याविधिं सर्व्वं यो विप्रोऽध्यापयेत् द्विजः। अध्यापको यथावस्थः श्रोता चैकाग्रमानसः। स सर्व्वपापनिर्मुक्तः सर्व्वविद्याविशारदः। अथ धान्यधनोपेतो जीवेद्वर्षशतं सुखी। एतद्विधानं योऽधीत्य श्रावयेत् ब्राह्मणोत्तमान्। प्रीतिपूर्व्वं प्रयत्नेन ब्राह्मणो नियमेन च। अज्ञानेन प्रमादेन दुरितं यत् समुत्थितम्। तस्य तत् सकलं नाशं व्रजेदत्र न संशयः। याः सन्ध्योपास्तयस्तिस्रो यस्य स्नानं विधीयते। पर्व्वणि श्रावणी यस्य तत् सर्व्वं पूर्णतामियात्। कामान्मोहाच्च लोभाच्च सन्ध्यां नातिक्रमेद् द्विजः। सन्ध्यातिक्रमणाद्विप्रो ब्राह्मण्याच्च्यवते यतः। अनागतां तु ये पूर्व्वामनतीताञ्च पश्चिमाम्। सन्ध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः?। सायं प्रातः सदा सन्ध्यां ये न विप्रा उपासते। कामं तान् धार्म्मिको राजा शूद्रकर्म्मसु योजयेत्। विधानमेतन्नो देयं रहस्यं यस्य कस्यचित्। वेदाध्यायाभिजाताय प्रदेयं स द्विजन्मने"। ब्राह्मणस० योगियाज्ञवल्क्यः "अतःपरं प्रवक्ष्यामि सन्ध्योपासनमुत्तमम्। अहोरात्रकृतैः पापैर्यामुपास्य प्रमुच्यते"। तथा "यावन्तोऽस्यां पृथिव्यां हि विकर्म्मस्थास्तु वै द्विजाः। तेषां वै पावनार्थाय सन्ध्या सृष्टा स्वयम्भुवा। या सन्ध्या सा तु गायत्री